ॐ आयुष्कामः यशस्कामः पुत्रकामस्तथैव च। आरोग्यं धनकामश्च सर्वे कामा भवन्तु ते॥

आहुति-मन्त्र– इसके उपरान्त अग्नि प्रज्ज्वलित करते हुए निम्नांकित मन्त्र का उच्चारण करें–

अग्नि प्रज्ज्वलितं वन्दे जातवेद हुताशनम्।
सुवर्णवर्णममलं समिद्धं विश्वतोमुखम्॥

इसके उपरान्त यज्ञ में आहुतियां प्रदान करें। घी से आहुति दें–

ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम।

(मन में बोलें।)

ॐ इन्द्राय स्वाहा, इदं इन्द्राय न मम।

ॐ अग्नये स्वाहा, इदं अग्नये न मम।

ॐ सोमाय स्वाहा, इदं सोमाय न मम। (सामग्री छोड़ें।)

ॐ भू स्वाहा, इदं अग्नये न मम।

ॐ भुवः स्वाहा, इदं वायवे न मम।

ॐ स्वः स्वाहा, इदं सूर्याय न मम।

एता महाब्याहृतयः।

ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान देवस्य-हेडो-ऽअवयासिसीष्ठाः। यजिष्ठो वन्हितमः शोशुचानो विश्वाद्वेषासि प्रमुमुग्ध्यस्मत् स्वाहा। इदं अग्नि-वरुणाभ्यां न मम।

ॐ सत्वन्नोऽअग्नेऽबतो-भवोतीनेदिष्ठोऽअस्याउषसो व्यष्टौ। अवयक्ष्वनो वरुणꣳरराणो वीहि मृडीक ꣳ सुवहो नऽएधि स्वाहा। इदं अग्नि वरुणाभ्यां न मम।

ॐ अयाश्चाग्ने स्यनभिशस्ति पाश्च सत्वमित्वमया असि अयानो यज्ञं वहास्ययानो धेहि भेषजꣳस्वाहा। इदं अग्नये अयसे न मम।

ॐ ये ते शतं वरुण ये सहस्रं यज्ञिया: पाशा वितता महानतस्ते-भिर्न्नो अद्य सवितोत विष्णर्विश्वे मुचन्तु मरुत: स्वर्का: स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्य स्वर्केभ्यश्च न मम।

ॐ उदुत्तमं वरुण पाश-मस्मद-बाधमं विमध्यम ँ श्रथाय। अथाब्बयमादित्य ब्रते तवानगसो-ऽअदितये स्याम स्वाहा। इदं वरुणायादित्या-दितये च न मम। एता: सर्वा: प्रायश्चित-संज्ञका।

ॐ गणपतये स्वाहा। इदं गणपतये न मम।

ॐ विष्णवे स्वाहा। इदं विष्णवे न मम।

ॐ शंभवे स्वाहा। इदं शंभवे न मम।

ॐ लक्ष्म्यै स्वाहा। इदं लक्ष्म्यै न मम।

ॐ भूम्यै स्वाहा। इदं भूम्यै न मम।

ॐ सूर्याय स्वाहा। इदं सूर्याय न मम।

ॐ चन्द्रमसे स्वाहा। इदं चन्द्रमसे न मम।

ॐ भौमाय स्वाहा। इदं भौमाय न मम।

ॐ बुधाय स्वाहा। इदं बुधाय न मम।

ॐ बृहस्पतये स्वाहा। इदं बृहस्पतये न मम।

ॐ शुक्राय स्वाहा। इदं शुक्राय न मम।

ॐ शनैश्चराय स्वाहा। इदं शनैश्चराय न मम।

ॐ राहवे स्वाहा। इदं राहवे न मम।

ॐ केतवे स्वाहा। इदं केतवे न मम।

ॐ व्युष्टयै स्वाहा। इदं व्युष्टयै न मम।

ॐ उग्राय स्वाहा। इदं उग्राय न मम।

ॐ शतक्रतवे स्वाहा। इदं शतक्रतवे न मम।

ॐ प्रजापतये स्वाहा। इदं प्रजापतये न मम। (मानसिक)

ॐ अग्नये स्विष्ट कृते स्वाहा। इदं अग्नये स्विष्ट कृते न मम।

ॐ सूर्यो ज्योतिर्ज्योति सूर्यः स्वाहा।

ॐ सूर्यो वर्चो ज्योतिर्बर्चः स्वाहा।

ॐ ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा।

ॐ सजूर्देवेन सवित्रा सजूरूसेन्द्रवत्या जुषाणः सूर्यो वेत स्वाहा।

ॐ अग्निर्ज्योतिर्ज्योति र्ज्योतिरग्नि सूर्य स्वाहा।

ॐ अग्निवर्चो ज्योतिर्वचः स्वाहा।

ॐ अग्निर्ज्योतिः र्ज्योतिरग्नि स्वाहा।

ॐ सजूर्देवेन सवित्रा सजूरा-येन्द्रवत्या जुषाणो ऽअग्निर्वेतु स्वाहा।

इसके उपरान्त अपने मन्त्र का जप करते हुए अग्नि में आहुतियां प्रदान करनी चाहिए।

तद्रोपरान्त स्त्रुव में सुपारी इत्यादि अथवा सूखा गोला, जिसमें सामग्री भरी हो, उससे पूर्णाहुति देनी चाहिए। पूर्णाहुति के समय निम्नांकित मन्त्र का उच्चारण करें—

ॐ मूर्द्धानं दिवोऽअरति पृथिव्या वैश्वानरमृत आजातमग्निम्। कवि ᳶ संम्राजम-तिथिं जनाना-मासन्ना पात्रं जनयन्त देवा स्वाहा।

इस प्रकार पूर्णाहुति प्रदान करें। इसके साथ ही न्यूनतापूर्ति के लिए प्रार्थना करें–

"ॐ सप्त ते अग्ने समिधः सप्त जिह्वा सप्त ऋषय, सप्त धाम प्रियाणि। सप्त होत्राः सप्तधात्वा यजन्ति सप्त योनीरा पृणस्व धृतेन स्वाहा॥"

अन्त में निम्नांकित वाक्य कहकर किया गया हवनकर्म भगवती को अर्पित करें।

"अनेन होमकर्मणा श्री धूमावती: प्रीयताम् न मम। श्री श्वेताम्बरार्पणामस्तु।"

बलिदान



॥ बलि हेतु मुद्रायें ॥

(1) **बटुक** : अंगूठे को अनामिका से मिलायें।

(2) **योगिनी** : तर्जनी, मध्यमा और अंगूठे को मिलायें।

(3) **क्षेत्रपाल** : अंगूठे को तर्जनी से मिलायें।
(4) **गणेश** : अंगूठे को मध्यमा से मिलायें।
(5) **भूत** : सभी अंगुलियों को मिलायें।

॥ बलि विधान॥

(1) त्रिकोण, वृत्त, चतुरस्र मण्डल बनाकर **"ॐ आधार शक्तये नमः"** बोलकर पूजन करें। फिर बलि पात्र की स्थापना कर **"ॐ बलि द्रव्याय नमः"** कहकर गन्ध, पुष्प आदि से पूजन करें तथा अंगूठे और अनामिका को मिलाते हुए मुद्रा बनाकर बलि स्वीकार करने हेतु बटुक भैरव से प्रार्थना करें–
"एहि एहि देवि पुत्र बटुकनाथ कपिल जटाभारभासुर त्रिनेत्र ज्वाला मुख सर्वविघ्नान् नाशय नाशय सर्वोपचार सहितं बलिं गृहण गृहण स्वाहा।" बटुकाय एष बलिर्न मम।

(2) **"यां योगिनीभ्यो नमः"** से योगिनिओं की पूजा कर उन्हें तर्जनी, मध्यमा और अंगूठे से मुद्रा बनाकर, बलि स्वीकार करने हेतु विनती करें–
"ॐ ॐ ॐ सर्वयोगिनीभ्यः सर्वडाकिनीभ्यः सर्वशाकिनीभ्यः त्रैलोक्यवासिनीभ्यो नमः। इमं पूजाबलिं गृहणीत हुं फट् स्वाहाः, सर्वयोगिनीभ्यो हुं फट् स्वाहा।" योगिनीभ्यः एष बलिर्न मम। जल अर्पित कर प्रणाम करें।

(3) **"क्षं क्षेत्रपालाय नमः, क्षेत्रपाल बलि मण्डलाय नमः, क्षेत्रपाल बलि द्रव्याय नमः।"** ऐसा बोलकर गन्ध, पुष्प

आदि से क्षेत्रपाल की पूजा करें। अंगूठे और तर्जनी को मिलाकर मुद्रा बनायें और क्षेत्रपाल से बलि स्वीकार करने हेतु प्रार्थना करें–

"ॐ क्षां क्षीं क्षूं क्षैं क्षौं क्षः क्षेत्रपाल इमं बलिं गृहण गृहण स्वाहा, क्षेत्रपालाय एष बलिर्न मम।" जल देकर प्रणाम करें।

(4) **"ॐ गं गणपतये नमः, गणपति बलिमण्डलाय नमः।"** ऐसा बोलकर गन्ध, पुष्पादि से गणपति की पूजा करें। फिर अंगूठे और मध्यमा को मिलाकर मुद्रा बनायें और गणपति से बलि स्वीकार करने हेतु प्रार्थना करें–

"ॐ गां गीं गूं गैं गौं गः गणपतये वरवरद सर्वजनं मे वशमानय इमं बलिं गृहण गृहण स्वाहा।" गणपतये एष बलिर्न मम। जल देकर प्रणाम करें।

(5) पूर्व की भांति मण्डल बनाकर पूजन करें। साधार बलिदान स्वीकार करने हेतु प्रार्थना करें– सभी अंगुलियों को मिलाकर मुद्रा बनाते हुए– **धूं सर्वविघ्नकृदभ्यः सर्वभूतेभ्यो हुं फट् स्वाहा। सर्वभूतेभ्यो एष बलिर्न मम।**

पुष्पाञ्जलि–

(6) तद्गोपरान्त हाथ-पैर धोकर भगवती को योनि मुद्रा का प्रदर्शन करते हुए प्रणाम करके आरती कर उन्हें पुष्पाञ्जलि अर्पित करें–

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥

नानासुगन्धि पुष्पाणि यथाकालोद् भवानि च।
पुष्पाञ्जलिर्मया दत्तो गृहाण परमेश्वरि॥

पुनः प्रदक्षिणा करके नमस्कार करें। फिर यन्त्र बनाकर पूजन करें और बलि स्थापना कर भगवती से बलि स्वीकार करने हेतु प्रार्थना करें–

"ॐ ऐं ह्रीं क्लीं श्रीं हुं धूं धूमावती सर्वशत्रु मर्दिनी सर्वराज वशंकरी एष ते बलिं गृहण गृहण ममाभीष्ट कुरु हुं फट् स्वाहा। धूमावत्यै एष बलिर्न मम।"

ऐसा कहकर भगवती को विशेष अर्घ्य प्रदान करें। शहद, मिश्री, गाय का दूध, केसर व अदरक से मिलकर विशेष अर्घ्य बनता है।

अब उच्छिष्ट भैरव को बलि प्रदान करें–

ॐ उच्छिष्ट भैरव एहि एहि बलिं गृहण गृहण हुं फट् स्वाहा।" और प्रणाम करें।

अब पूजागृह से बाहर जाकर बटुक वाहन को बलि प्रदान करें– एक चतुरस्त्र मण्डल बनाकर उसमें बलि रखकर बटुक वाहन को प्रदान करें–

"बटुक वाहन इमां पूजां बलिं च गृहण गृहण स्वाहा।" तथा जल छिड़कें।

तद्नोपरान्त हाथ-पैर धोकर पूजागृह में प्रवेश कर आसन पर बैठकर आचमन कर शान्ति पाठ करें। फिर निर्माल्य सहित नैवेद्य की बलि प्रदान करने हेतु उच्छिष्ट चाण्डालिनी का ध्यान करें तथा बलि स्वीकार करने हेतु प्रार्थना करें–

"ऐं नमः उच्छिष्टचाण्डालिनी मातंगिसर्वजनवशंकरी इमां पूजां बलिं च गृहण गृहण स्वाहा।"

इसके उपरान्त अज्ञानवश हुई त्रुटि के लिए क्षमा मांगते हुए भगवती से प्रार्थना करें–

॥ प्रार्थना ॥

ॐ यद् दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलम्।
निवेदितं च नैवेद्यं तद् गृहाणाऽनुकम्पया॥
आवाहनं न जानामि न जानामि विसर्जनम्।
पूजामर्चां न जानामि त्वं गतिः परमेश्वरि॥
कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम।
अन्तश्चारेण भूतानां दृष्टि त्वं परमेश्वरि॥
मातर्योनि - सहस्रेषु येषु येषु व्रजाम्यहम्।
तेषु तेष्वचला भक्तिर-व्ययाऽस्तु सदा त्वयि॥
देवी दात्री च भोक्त्री च देवी सर्वमिदं जगत्।
देवी जयति सर्वत्र या देवी साऽहमेव च॥
ॐ रश्मिरूपा महेशान्याश्चात्र पूजित देवताः।
श्वेताम्बरांगे लीनास्ताः सन्तु सर्वं सुखावहा॥
ॐ तिष्ठ तिष्ठ परंस्थान स्वस्थानं परमेश्वरि!।
यत्र ब्रह्मादयो देवाः सुरास्तिष्ठन्ति मे हृदि॥
यदक्षर - पद - भ्रष्टं मात्राहीनं च यद् भवेत्।
तत् सर्वं क्षम्यतां देवी प्रसीद परमेश्वरि॥

प्रदक्षिणा– इस प्रकार भगवती से क्षमा-प्रार्थना करने के

उपरान्त अग्रिम मन्त्र बोलते हुए परिक्रमा करें–

यानि कानि च पापानि जन्मान्तर कृतानी च।
तानि सर्वाणि नश्यन्ति प्रदक्षिणे पदे पदे॥

इसके बाद आचमनी से जल छोड़ते हुए "अनया पूजया श्री महामाया धूमावती प्रियताम्। ॐ तत्सत्" बोलकर भगवती को दण्डवत् प्रणाम करें।

ॐ

पृष्ठ 10 का शेष

आदौ काली च तद्-यक्षी महा-'मधुमति' परा,
द्वितीया 'भ्रमराम्बा' च सुन्दर्या सुर-सुन्दरी।
भैरव्या 'श्चन्द्र-रेखा' च यक्षिणी परिकीर्तिता,
तारायास्तारिणी यक्षी 'विकटा पद्म-नायिका'।।
छिन्नाया 'लम्पटा' यक्षी बगलाया 'विडालिका',
कमलायास्तु 'धनदा' भुवनेश्याः शृणु प्रिये!
'त्रैलोक्य-मोहिनी' यक्षी मातंग्याः शृणु पार्वति!
'श्रीमनो-हारिणी' प्रोक्ता धूमावत्याः शृणु प्रिये!
'भीषणी' यक्षिणी प्रोक्ता प्रोक्तेयं दश यक्षिणी।
एतद्-ज्ञानतो देवि! न हि सिद्ध्यन्ति कुत्र-चित्।।

इस प्रकार दश यक्षिणियों के नामों का ज्ञान होता है—

महाविद्या		यक्षिणी
1. काली	:	महा-मधुमती
2. तारा	:	विकटा पद्म-नायिका
3. षोडशी	:	भ्रमराम्बा सुर-सुन्दरी
4. भुवनेश्वरी	:	त्रैलोक्य-मोहिनी
5. भैरवी	:	चन्द्ररेखा
6. छिन्नमस्ता	:	लम्पटा
7. धूमावती	:	भीषणी
8. बगलामुखी	:	विडालिका

शेष पृष्ठ 122 पर

अध्याय 8

श्री धूमावती कवचम्

॥ दशांगों में मुख्य अंग ॥

अर्चन के दश अंगों में कवच भी एक मुख्य अंग है। जिस प्रकार राज्य-प्राप्ति के लिए किले, खाई, तोप, हथियार, रथ तथा धन आदि की आवश्यकता होती है, उसी प्रकार सिद्धि (राज्य) पर विजय प्राप्ति के लिए भी इन सबकी आवश्यकता होती है। राजा (साधक) यदि कवच नहीं पहनेगा तो रण (मन्त्र-सिद्धि) में विजय प्राप्ति के स्थान पर पीठ दिखानी पड़ सकती है।

॥ कवच की महत्ता ॥

साधना-काल में कवच किस प्रकार पहना जाता है? आदिगुरु शंकराचार्य जी कहते हैं कि– **"कवचं कवचरूपं स्यात्"**– अपने इष्ट-देवता का कवच-पाठ करना ही कवच पहनना है। वास्तव में कवच एक रक्षा उपकरण होता है जो योद्धा (साधक) को आयुधों के आघातों से रक्षा करने में अति सहायक सिद्ध होता है। साधक द्वारा अपने इष्ट-देवता का कवच-पाठ अदृष्ट आसुरी शक्तियों से रक्षा

करने के साथ-साथ अनेकानेक रूप से सिद्धिदायक भी होता है। इसलिए कहा गया है कि– **"पठित्वा धारयित्वा तु त्रैलोक्ये विजयी भवेत्।"** इसके अतिरिक्त **"सारूप्यं कवचाख्यं"** अर्थात् कवच से देवता का सारूप्य प्राप्त होता है। कवच स्तोत्र सदैव साधक के साथ सहचर बनकर रहे **"स्तोत्र सहचरो भवेत्"** अर्थात् उसका सदैव पाठ होता रहे तो इससे हमें अपने इष्टदेव का सायुज्य प्राप्त होगा।

अतः यह स्पष्ट हो जाता है कि **"पठनाद् धारणादस्य पूजनात् वांछितं लभेत्"** अर्थात् कवच का पाठ करने से बाह्य अदृश्य आसुरी शक्तियों से रक्षा होने के साथ-साथ वांछित फल भी प्राप्त होते हैं। इसीलिए पूजन अथवा साधना-क्रम में कवच-पाठ अतीव आवश्यक अंग है। इसी क्रम में यहां भगवती धूमावती के विशिष्ट कवच का उल्लेख किया जा रहा है।

॥ प्रमाणीकरण की आवश्यकता ॥

साधकों को मेरा परामर्श है कि धूमावती एक तीव्र विद्या है, अतः पुस्तक से पढ़कर प्रयोगों का सम्पादन, साधक के लिए अनिष्टकारक हो सकता है। पुस्तक में पढ़ें, यह एक अच्छी बात है, लेकिन जब तक पुस्तकीय विधान को अपने सद्गुरु से प्रमाणित न करा लें तब तक उस प्रयोग को करने की भूल कदापि न करें। इस कवच के माध्यम से काफी प्रयोग सम्पादित किये जाते हैं, जो गुरुमुख से ज्ञात करना ही उत्तम एवं आवश्यक है।

श्री पार्वत्युवाच–

धूमावत्यर्चनं शंभो श्रुतं विस्तारतोमया।
कवचं श्रोतुमिच्छामि तस्या देव वदस्व मे॥१॥

श्री भैरव उवाच–

शृणु देवि परंगुह्यं न प्रकाश्यं कलौयुगे।
कवचं धूमावत्याश्शत्रुनिग्रह कारकम्॥२॥
ब्रह्माद्या देवि सततं यद्वशादरिघातिनः।
योगिनोऽभवन्छत्रुघ्ना यस्या ध्यानप्रभावतः॥३॥

विनियोग– ॐ अस्य श्री धूमावती-कवचस्य पिप्पलाद ऋषिः, अनुष्टुप् छन्दः, श्री धूमावती देवता, धूं बीजं, स्वाहा शक्तिः, धूमावती कीलकं, शत्रुहनने पाठे विनियोगः।

॥ कवच-पाठ ॥

ॐ धूं बीजं मे शिरः पातु धूं ललाटं सदाऽवतु।
धूमा नेत्र युगम्पातु वती कर्णौ सदाऽवतु॥
दीर्घा तूदर-मध्ये तु नाभिं मे मलिनाम्बरा।
शूर्प-हस्ता पातु गुह्यं रूक्षा रक्षतु जानुनी॥
मुखं मे पातु भीमाख्या स्वाहा रक्षतु नासिकाम्।
सर्वा विद्याऽवतु कण्ठं विवर्णा बाहुयुग्मकम्॥
चंचला हृदयं पातु दुष्टा पार्श्वं - सदाऽवतु।
धूमहस्ता सदा पातु पादौ पातु भयावहा॥

प्रवृद्ध - रोमा तु भृशंकुटिला कुटिलेक्षणा।
क्षुत्पिपासादि्र्दता देवी भयदा कलहप्रिया।।
सर्वांगम्पातु मे देवी सर्व - शत्रु विनाशिनी।
इति ते कवचं-पुण्यं-कथितं भुवि दुर्लभम्।।
न प्रकाश्यं न प्रकाश्यं न प्रकाश्यं कलौयुगे।
पठनीयं महादेवि त्रिसन्ध्यन्ध्यान तत्परैः।।
दुष्टाभिचारो देवेशि तद्गात्रन्नैव संस्पृशेत्।।

(इति भैरवी-भैरव सम्वादे धूमावतीतत्वे धूमावती कवचं सम्पूर्णम्)

ॐ

अध्याय 9

श्री धूमावती हृदयम्

किसी भी देवी या देवता से सम्बन्धित हृदय स्तोत्र देवता का हृदय ही होता है। यह स्तोत्र भगवती धूमावती से सम्बन्धित है। उनके हृदय में बस जाना या फिर उन्हें अपने हृदय में बसा लेना– ये दोनों ही विकल्प इस पाठ का उद्देश्य है। उनके हृदय में निवास कर पाना तो एक दिवा-स्वप्न मात्र ही है, क्योंकि इसके लिए तो परम शक्तिमान भी लालायित रहते हैं। हां, हमारी भक्ति के प्रसाद-स्वरूप यह फल अवश्य मिल सकता है कि ये विश्वाश्रय हमारे हृदय में बस जायें और वास्तव में जीवन का यही तो लक्ष्य है, तभी तो हमारा उद्धार सम्भव है।

विनियोग– ॐ अस्य श्री धूमावती-हृदय-स्तोत्र-मन्त्रस्य पिप्लाद ऋषि, अनुष्टुप् छन्दः, श्री धूमावती देवता, धूं बीजं, ह्रीं शक्ति, क्लीं कीलकं सर्व-शत्रु-संहारणे पाठे विनियोगः।

अंगन्यास–

धां हृदयाय नमः।

धीं शिरसे स्वाहा।

धूं शिखायै वषट्।
धैं कवचाय हुम्।
धौं नेत्रत्रयाय वौषट्।
धः अस्त्राय फट्।
करन्यास–
धां अंगुष्ठाभ्यां नमः।
धीं तर्जनीभ्यां स्वाहा।
धूं मध्यमाभ्यां वषट्।
धैं अनामिकाभ्यां हुम्।
धौं कनिष्ठाभ्यां वौषट्।
धः करतल-कर-पृष्ठाभ्यां फट्।

॥ ध्यानम् ॥

धूम्राभान्धूम्र - वस्त्रां - प्रकटितदशनां - मुक्त - बालाम्बराढ्यां,
काकांकस्यन्दनस्थां - धवलकरयुगां शूर्पहस्तातिरूक्षाम्।
नित्यं क्षुत्क्षान्तदेहां-मुहुरति-कुटिलां वारिवांछाविचित्तां,
ध्यायेद्-धूमावती-वामनयन-युगलां-भीतिदां-भीषणास्याम्॥१॥

॥ स्तोत्र ॥

कल्पादौ या कालिकाद्याऽचीकलन्मधु-कैटभौ।
कल्पान्ते त्रिजगत्सर्वं धूमावतीं भजामिताम्॥२॥
खटवांग-धारिणी खर्वा खण्डिनी खल-रक्षसाम्।
धारिणी खेटकस्यापि धूमावतीं भजामिताम्॥३॥

गुणागारा गम्यगुणा या गुणा गुणवर्धिनी।
गीता - वेदार्थ - तत्वज्ञै - र्धूमावतीं भजामिताम्॥४॥
घूर्ण्ण-घूर्ण्णकरा घोरा घर्ण्णिताक्षी घनस्वना।
घातिनी घातकानां या धूमावतीं भजामिताम्॥५॥
चर्वन्तिं-अस्थि-खंडानां-चण्डमुण्ड विदारिणीम्।
चण्डाट्टहासिनीं - देवीं - भजे धूमावतीमहम्॥६॥
छिन्नग्रीवां - क्षताच्छन्नांछिन्नमस्ता -स्वरूपिणीम्।
छेदिनीन्दुष्ट - संङ्घानां - भजे धूमावतीमहम्॥७॥
जाता या याचिता देवैरसुराणां विघातिनीम्।
जल्पन्ति बहु गर्जन्ति भजे तां धूम्रस्वरूपिणीम्॥८॥
झंकारकारिणा झंझा झंझमाझमवादिनीम्।
झटित्याकर्षिणीं - देवीं भजे धूमावतीमहम्॥९॥
टीपटंकार - संयुक्तां - धनुषटंकार - कारिणीम्।
घोरा घनघटाटोपां वन्दे धूमावतीमहम्॥१०॥
ठण्ठण्ठण्ठम्मनु-प्रीतिण्ठः ठः मन्त्रस्वरूपिणीम्।
ठमकाह्वगतिप्रीतां भजे धूमावतीमहम्॥११॥
डमरू - डिण्डिमारावां- डाकिनीगण-मण्डिताम्।
डाकिनी - भोग - सन्तुष्टां भजे धूमावतीमहम्॥१२॥
ढक्कना-नादेन-सन्तुष्टां ढक्क्नावादक-सिद्धिदाम्।
ढक्कावाद - चलच्चित्ताम्भजे धूमावतीमहम्॥१३॥
तत्त्वार्तांप्रिय - प्राणां - भवपाथोधि - तारिणीम्।
तारस्वरूपिणीं - ताराम्भजे धूमावतीमहम्॥१४॥

थां थीं थूं थें-मंत्ररूपां थैं थौं थं थः स्वरूपिणीम्।
थकार - वर्ण - सरस्वाम्भजे धूमावतीमहम्॥१५॥
दुर्गा - स्वरूपिणीं - देवीं - दुष्ट-दानवदारिणीम्।
देवदैत्य - कृतध्वंसां वन्दे धूमावतीमहम्॥१६॥
ध्वांताकारांधकध्वं - साम्मुक्त - धर्मालधारिणीम्।
धूमधारा - प्रभान्धीराम्भजे धूमावतीमहम्॥१७॥
नर्तकीनटनप्रीतां - नाट्य - कर्म - विवर्द्धिनीम्।
नारसिंहींनराराध्यां - नौमि धूमावतीमहम्॥१८॥
पार्वतीपति - सम्पूज्यां - पर्वतोपरि - वासिनीम्।
पद्मारूपां - पद्म - पूज्यान्नौमि धूमावतीमहम्॥१९॥
फूत्कारसहितश्वासां - फट्मन्त्र फलदायिनीम्।
फेत्कारिगण - संसेव्यां सेवे धूमवतीमहम्॥२०॥
बलिपूज्यां बलाराधयाम्बगला - रूपिणीं वराम्।
ब्रह्मादिवन्दितां विद्यां वन्दे धूमावतीमहम्॥२१॥
भव्यरूपां - भवाराध्यां - भुवनेशीस्वरूपिणीम्।
भक्त - भव्य - प्रदान्देवीं - भजे धूमावतीमहम्॥२२॥
मायां - मधुमतीं - मान्यां - मकरध्वज - मानिताम्।
मत्स्य - मांसमदा - स्वादाम्मन्ये धूमावतीमहम्॥२३॥
योग - यज्ञ - प्रसन्नास्यां योगिनी - परिसेविताम्।
यशोदां यज्ञफलदां यजे धूमावतीमहम्॥२४॥
श्रामाराध्य - पदद्वन्द्वां रावण - ध्वंसकारिणीम्।
रमेशरमणी - पूज्यामहं धूमावतीं श्रये॥२५॥

लक्षलीलाकला - लक्ष्यां लोकवन्द्य-पदाम्बुजाम्।
लम्बीतां - बीजकोशढ्यां वन्दे धूमावतीमहम्॥२६॥
बकपूज्यपदाम्भोजां - बकध्यान - परायणाम्।
बालाम्बकारि - सन्ध्येयां वन्दे धूमावतीमहम्॥२७॥
शंकरीं शंकरप्राणां संकट - ध्वंसकारिणीम्।
शत्रु - संहारिणीं शुद्धां श्रये धूमावतीमहम्॥२८॥
षडार्ननारिसंहन्त्रीं षोडशी - रूपधारिणीम्।
षड्रसास्वादिनीं सौम्यां सेवे धूमावतीमहम्॥२९॥
सुरसेवित - पादाब्जां सुरसौख्य - प्रदायिनीम्।
सुन्दरीगण - संसेव्यां सेवे धूमावतीमहम्॥३०॥
हेरम्ब-जननीं योग्यां हास्य-लास्य-विहारिणीम्।
हारिणीं शत्रु - संघानां सेवे धूमावतीमहम्॥३१॥
क्षीरोदतीरं - सम्वासां क्षीरपान - प्रहर्षिताम्।
क्षणदेशेज्य - पादाब्जां सेवे धूमावतीमहम्॥३२॥
चतुस्त्रिंशद्वर्णकानां प्रतिवर्णादिनामभिः।
कृतंतु हृदयस्तोत्रं धूमावत्याः सुसिद्धिदम्॥३३॥
यं इदं पठति स्तोत्रं पवित्रं पापनाशनम्।
स प्राप्नोति परां सिद्धिं धूमावत्या प्रसादतः॥३४॥
पठेन्नेकाग्रचित्तो यो यद्यदिच्छति मानवः।
तत्सर्वं समवाप्नोति सत्यं सत्यं वदाम्यहम्॥३५॥

(इति श्री धूमावती हृदयं समाप्तम्)

ॐ

पृष्ठ 112 का शेष

9. **मातंगी** : **मनोहारिणी**

10. **कमला** : **धनदा**

इनके अतिरिक्त **'हिन्दी मन्त्र-महार्णव'** के अनुसार 36 यक्षिणियों के नामों का उल्लेख प्राप्त होता है–

1. **विचित्रा**
2. **विभ्रमा**
3. **हंसी**
4. **भिक्षिणी**
5. **जन-रञ्जिका**
6. **विशाला**
7. **मदना**
8. **घण्टा**
9. **काल-कर्णी**
10. **महाभया**
11. **माहेन्द्री**
12. **शंखिनी**
13. **चान्द्री**
14. **श्मशानी**
15. **वट-यक्षिणी**
16. **मेखला**
17. **विकला**
18. **लक्ष्मी**
19. **माननी**
20. **शत-पत्रिका**
21. **सु-लोचना**
22. **सु-शोभना**
23. **कपालिनी**
24. **विलासिनी**
25. **नटी**
26. **कामेश्वरी**
27. **स्वर्ण-रेखा**
28. **सुर-सुन्दरी**
29. **मनोहरी**
30. **प्रमदा (प्रमोदा)**
31. **अनुरागिणी**
32. **नख-केशिका**
33. **नेमिनी (माविनी)**
34. **पद्मिनी (पद्मावती)**
35. **स्वर्णवती, कनकावती**
36. **रति-प्रिया**

अध्याय 10

श्री धूमावती-स्तोत्रम्

भगवती धूमावती का यह स्तोत्र शत्रु-शमन, विघ्नादि का शमन तथा अशुभ ग्रहों के स्तम्भन और दारिद्रय का नाश करने के सन्दर्भ में अतीव प्रतिष्ठित है। जो साधक इस स्तोत्र का पाठ एकाग्रचित्त एवं समर्पित भाव से तीनों संध्याओं में करता है, उसके शत्रुगण उसे मूक होकर देखते रह जाते हैं। उसके सौभाग्य का उदय होता है और शत्रुगण का गर्व खण्डित होता है। सबसे बड़ी बात यह है कि भगवती की कृपा और सानिध्य उस सौभाग्यशाली को प्राप्त होता है।

प्रातर्या स्यात्कुमारी कुसुमकलिकया जापमाला जपन्ती,
मध्याह्ने प्रौढरूपा विकसितवदना चारूनेत्रा निशायाम्॥
सन्ध्यायां वृद्धरूपा गलितकुचयुगां मुण्डमालां वहन्ती,
सा देवी देवदेवी त्रिभुवन-जननी कालिका पातु युष्मान्॥१॥
वद्ध्वा खट्वांगकोटौ कपिलवर-जटामंडलं-पद्मयोनेः,
कृत्वा दैत्योत्त्मांगैस्रजमुरसि-शिरः शेखरं ताक्ष्र्यपक्षैः॥
पूर्ण रक्तैस्सुराणां यम-महिष-महा-शृंगमादाय पाणौ,
पायाद्वो वन्द्यमान-प्रलयमुदितया भैरवः कालरात्र्याम्॥२॥

चर्वन्तीमस्थिखण्डं प्रकट-कट-कटा-शब्द-संघातमुग्रं,
कुर्वाणा प्रेतमध्ये कहह-कह-कहा-हास्यमुग्रङ्कृशांगी॥
नित्यन्नित्य प्रसक्ता डमरूडिमडिमां स्फारयन्ती मुखाब्जं,
पायान्नश्चण्डिकेयं झझमझमझमाजल्पमाना भ्रमन्ती॥३॥
टंटंटंटंटंटंटाप्रकरटमटमानादघण्टा वहन्ती,
स्फें स्फें स्फेंस्कारकारा टकटकितहसा नादसंघट्टभीमा॥
लोलण्मुण्डाग्रमाला ललहलहलहालोललोलाग्रवाचं,
चर्वन्तीं चण्डमुण्डं मटमटमटितैश्चर्वयन्ती पुनातु॥४॥
वामे कर्णे मृगांक प्रलय परिगतं दक्षिणे सूर्यबिम्बं,
कण्ठे नक्षत्रहारं वरविकटजटाजूट के मुण्डमालाम्॥
स्कन्धे कृत्वोरगेन्द्रध्वजनिकरयुतं ब्रह्मकंकालभारं,
संहारे धारयन्ती मम हरतु भयं भद्रदा भद्रकाली॥५॥
तैलाभ्यक्तकवेणी त्रपुमयविलसत्कर्णिकाक्रान्तकर्णा,
लौहेनैकेनं कृत्वा चरणनलिनकामात्मनः पादशोभाम्॥
दिग्वासा रासभेन ग्रसति जगदिदं या यवाकर्णपूरा,
वर्षिण्यातिप्रवृद्धा ध्वजविततभुजा सासि देवि त्वमेव॥६॥
संग्रामे हेतिकृत्तैः सरूधिरदशनैर्यद्भटानां शिरोभिर्माला-
माबद्ध्य मूर्ध्नि ध्वजविततभुजा त्वं श्मशाने प्रविष्टा॥
दृष्टा भूतप्रभूतैः पृथुतरज घनाबद्धनागेन्द्रकाञ्ची,
शूलाग्रव्यग्रहस्ता मधुरुधिरसदाताम्रनेत्रा निशायाम्॥७॥

दंष्ट्रारौद्रे मुखेऽस्मिस्तव विऽशति जगद्देवि सर्वं क्षणार्द्धात्,
संसारस्यान्तकाले नररुधिरवशासम्प्लवे धूमधूम्रे॥
काली कापालिकी सा शवशयनरता योगिनी योगमुद्रा,
रक्ता ऋद्धिः सभास्था मरणभयहरा त्वं शिवा चंडघंटा॥८॥
धूमावत्यष्टकं पुण्यं सर्वापद्धिनिवारकम्॥
यः पठेत्साधको भक्त्या सिद्धिं विंदति वाञ्छिताम्॥९॥
महापदि महाघोरे महारागे महारणे॥
शत्रुच्चाटे मारणादौ जन्तुनां मोहने तथा॥१०॥
पठेत्स्तोत्रमिदं देवि सर्वत्र सिद्धिभाग्भवेत्॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः॥११॥
सिंहव्याघ्रादिकाः सर्वे स्तोत्रस्मरणमात्रतः॥
दूराद्दरतरं यान्ति किं पुनर्मानुषादयः॥१२॥
स्तोत्रेणानेन देवेशि किं न सिद्ध्यति भूतले॥
सर्वशान्तिर्भवेद्देवि अन्ते निर्वाणतां व्रजेत॥१३॥

(इत्यूद्ध्वाम्नाये धूमावती स्तोत्रं समाप्तम्)

॥ नोट करने योग्य ॥

....

....

....

....

....

....

....

....

....

....

....

....

....

....

....

....

....

....

....

....

....

अध्याय 11

श्री धूमावती शतनाम स्तोत्रम्

भगवती धूमावती के एक सौ आठ नामों का यह परम पुनीत स्तोत्र है, जिसे एक बार पूरा पढ़ने से एक आवृत्ति पूर्ण होती है। महामाया धूमावती का यह स्तोत्र घोर पाप-नाशक और शत्रु-विनाशक है। इसका पाठ करने मात्र से ही शत्रु का विलय हो जाता है। यदि सम्भव हो सके तो किसी कालरात्रि अथवा ग्रहण काल में इस स्तोत्र की एक सौ आठ की संख्या में आवृत्तियां कर लेनी चाहिए।

ॐ धूमावती धूम्रवर्णा धूम्रपान - परायणा।
धूम्राक्ष - मथिनी धन्या धन्य-स्थान-निवासिनी॥१॥
अघोराचार - सन्तुष्टा अघोराचार - मण्डिता।
अघोरमन्त्र - सम्प्रीता अघोरमन्त्र - पूजिता॥२॥
अट्टाट्टहास - निरता मलिनाम्बर - धारिणी।
वृद्धा विरूपा विधवा विद्या च विरलद्विजा॥३॥
प्रवृद्ध - घोणा कुमुखी कुटिला कुटिलेक्षणा।
कराली च करालास्या कंकाली शूर्पधारिणी॥४॥

काकध्वजा - रथारूढा केवला कठिना कुहू:।
क्षुत्पिपासार्द्दिता नित्या ललज्जिह्वा दिगम्बरी।।५।।
दीर्घोदरी दीर्घरवा दीर्घांगी दीर्घमस्तका।
विमुक्त-कुन्तला कीर्त्या कैलासस्थान-वासिनी।।६।।
क्रूरा कालस्वरूपा च कालचक्र-प्रवर्तिनी।
विवर्णा चञ्चला दुष्टा दुष्ट-विध्वंसकारिणी।।७।।
चंडी चंड-स्वरूपा च चामुण्डा चण्ड-निस्स्वना।
चण्डवेगा चण्ड-गतिश्च चण्डमुण्ड-विनाशिनी।।८।।
चाण्डालिनी चित्ररेखा चित्रांगी चित्रस्वरूपिणी।
कृष्णा कपर्द्दिनी कुल्ला कृष्णारूपा क्रियावती।।९।।
कुम्भस्तनी महोन्मत्ता मदिरा-पान-विह्वला।
चतुर्भुजा ललज्जिह्वा शत्रु - संहार - कारिणी।।१०।।
शवारूढा - शवगता श्मशान-स्थान-वासिनी।
दुराराध्या दुराचारा दुर्जन - प्रीति - दायिनी।।११।।
निर्मांसा च निराकार धूमहस्ता वरान्विता।
कलहा च कलिप्रीता कलिकल्मषनाशिनी।।१२।।
महाकालस्वरूपा च महाकाल - प्रपूजिता।
महादेवप्रिया मेधा महासंकट - हारिणी।।१३।।
भक्तप्रिया भक्त-गतिर्भक्त-शत्रु-विनाशिनी।
भैरवी भुवना भीमा भारती भुवनात्मिका।।१४।।
भरूण्डा भीमनयना त्रिनेत्रा बहुरूपिणी।
त्रिलोकेशी त्रिकालज्ञा त्रिस्वरूपा त्रयीतनुः।।१५।।

त्रिमूर्तिश्च तथा तन्वी त्रिशक्तिश्च त्रिशूलिनी।
इति धूमामहत्स्तोत्रं नाम्नामष्ट - शतात्मकम्॥१६॥
मया ते कथितं देवि शत्रु-संघ विनाशनम्।
कारागारे रिपुग्रस्ते महोत्पाते महाभये॥१७॥
इदं स्तोत्रं पठेन्मर्त्यो मुच्यते सर्वसंकटैः।
गुह्याद्गुह्यतरं गुह्यंगोपनीयं प्रयत्नतः॥१८॥
चतुष्पदार्थदन्नृणां सर्वसम्पत्प्रदायकम्॥१९॥

(इति श्री धूमावती शतनाम स्तोत्रम् समाप्तम्)

ॐ

॥ नोट करने योग्य ॥

....
....
....
....
....
....
....
....
....
....
....
....
....
....
....
....
....
....
....
....
....

अध्याय 12

श्री धूमावती सहस्रनाम स्तोत्रम्

जब हम अपने बहुत प्रिय किसी देवी-देवता की पूजा-अर्चना करते हैं तब उस पूजा में कोई पाठ अथवा स्तोत्र आदि ऐसा अवश्य होता है, जिसे करते हुए हमें अत्यधिक आनन्द की प्राप्ति होती है। उस पाठ अथवा स्तोत्र को बार-बार करने का मन होता है। अपने उस देवी अथवा देवता का चिन्तन करते-करते हमारी आंखों से अश्रुधारा प्रवाहित होने लगती है। हृदय भर उठता है, लाख प्रयास करने पर भी आंसू रुक नहीं पाते। ठीक ऐसी ही स्थिति इस सहस्रनाम की है। इस प्रकरण में पहले सहस्रनामों को श्लोक के रूप में प्रस्तुत किया गया है। उसके बाद मेरे द्वारा सहस्रनामों को नामार्चन के रूप में उल्लिखित किया गया है। इस प्रयोग में हम भगवती धूमावती के प्रत्येक नाम को बोलकर उसके अन्त में 'नमः' शब्द बोलते हैं और कुछ सामग्री धूमावती यन्त्र अथवा उनकी मूर्ति या चित्र पर छोड़ते जाते हैं। इस सामग्री में हम काजू, श्वेत पुष्प अथवा श्वेत चावलों का प्रयोग करते हैं। आप भी इस प्रयोग को करके देखिये, जितना प्रेम, समर्पण और भाव आप प्रस्तुत कर सकते हैं, करिये। इस अर्चन में यह भी भाव रखिये कि आपके प्रत्येक अर्चन के साथ आपके कष्ट, आपकी पीड़ा

भी एक-एक करके समाप्त होती जा रही है। विश्वास कीजिये! इसका बहुत ही उत्तम परिणाम आप कुछ ही समय बाद स्वयं देखेंगे।

श्रीदेव्युवाच–

धूमावत्या धर्मराञ्याः कथयस्व महेश्वर।
सहस्रनामस्तोत्रं मे सर्वसिद्धि प्रदायकम्॥१॥

श्री भैरव उवाच–

शृणु देवि महामाये प्रिये - प्राणस्वरूपिणी।
सहस्र - स्तोत्रं मे भवशत्रु - विनाशनम्॥२॥

विनियोग– ॐ अस्य श्री धूमावती सहस्रनाम स्तोत्रस्य पिप्लाद ऋषिः, पंक्तिश्छन्दो, धूमावती देवता, शत्रु विनिग्रहे पाठे विनियोगः।

॥ स्तोत्र ॥

धूमा धूमवती धूमा धूमपान परायणा।
धौता धौतगिरा धाम्नी धूमेश्वर - निवासिनी॥३॥
अनन्ता अनन्तरूपा च अकाराकाररूपिणी।
आद्या आनन्ददानन्दा इकारा इन्द्ररूपिणी॥४॥
धनधान्यार्त्थ - वाणीदा यशोधर्म - प्रियेष्टदा।
भाग्य सौभाग्य - भक्तिस्था गृह - पर्वतवासिनी॥५॥
राम - रावण - सुग्रीव मोहदा हनुमत्प्रिया।
वेदशास्त्रा - पुराणज्ञा ज्योतिश्छन्दःस्वरूपिणी॥६॥

चातुर्यचारूरूचिरा रञ्जन - प्रेम - तोषदा।
कमलासन - सुधावक्त्रा चन्द्रहासा स्मितानना॥७॥
चतुरा चारूकेशी च चतुर्वर्गप्रदा मुदा।
कला कलाधरा धीरा धारिणी वसुनीरदा॥८॥
हीरा हीरकवर्णाभा हरिणायतलोचना।
दम्भ - मोह - क्रोध - लोभ - स्नेह - द्वेषहरा परा॥९॥
नरदेवकरी रामा रामानन्द मनोहरा।
योग - भोग - क्रोध - लोभहरा हर - नमस्कृता॥१०॥
दानमान - ज्ञानमान - पानगान सुखप्रदा।
गजगोश्वपदा - गञ्जा भूतिदा भूतनाशिनी॥११॥
भवभावा तथा बाला वरदा हरवल्लभा।
भगभंगभया माला मालतीतालना ह्लदा॥१२॥
जाल-वाल-हाल-काल कपाल - प्रियवादिनी।
करञ्जशील - गुञ्जाढ्या चूतांकुर - निवासिनी॥१३॥
पनसस्था पानसक्ता पनशेश - कुटुम्बिनी।
पावनी पावनाधारापूर्णा पूर्ण मनोरथा॥१४॥
पूत पूतकला पौरा पुराण सुरसुन्दरी।
परेशी परदा पारा परात्मा परमोहिनी॥१५॥
जगन्माया जगत्कर्त्री जगत्कीर्तिर्जगन्मयी।
जननी जयनि जायाजिता जिनजयप्रदा॥१६॥
कीर्ति - ज्ञान - ध्यान - मानदायिनी दानवेश्वरी।
काव्य - व्याकरणज्ञाना प्रज्ञा - प्रज्ञानदायिनी॥१७॥

विज्ञाज्ञा विज्ञजयदा विज्ञा विज्ञ - प्रपूजिता।
परावरेज्या वरदा पारदा शारदा दरा॥१८॥
दारिणी देवदूती च मदना मदनामदा।
परमज्ञानगम्या च परेशी परगा परा॥१९॥
यज्ञा यज्ञप्रदा यज्ञज्ञानकार्यकरी शुभा।
शोभिनी शुभ्रमथिनी निशुम्भासुर मर्दिनी॥२०॥
शाम्भवी शम्भुपत्नी च शम्भुजाया शुभानना।
शांकरी शंकराराध्या सन्ध्या सन्ध्यासुधर्मिणी॥२१॥
शत्रुघ्नी शत्रुहा शत्रुप्रदा शात्रवनाशिनी।
शैवी शिवलया शैला शैलराजप्रिया सदा॥२२॥
शर्वरी शबरी शम्भुः सुधाढ्या सौधवासिनी।
सगुणा गुणरूपा च गौरवी भैरवीरवा॥२३॥
गौरांगी गौरदेहा च गौरी गुरुमती गुरुः।
गौर्गौर्गव्यस्वरूपा च गुणानन्दस्वरूपिणी॥२४॥
गणेशगणदा गुण्या गुणा गौरव - वाञ्छिता।
गणमाता गणाराध्या गणकोटिविनाशिनी॥२५॥
दुर्गा दुर्जनहन्त्री च दुर्जनप्रीति - दायिनी।
स्वर्गापवर्गदा दात्री दीना दीनदयावती॥२६॥
दुर्निरीक्ष्या दुरादु:स्था दौ:स्थ्यभञ्जनकारिणी।
श्वेतपाण्डरकृष्णाभा कालदा कालनाशिनी॥२७॥
कर्मनर्मकरी नर्मा धर्माधर्मविनाशिनी।
गौरी गौरवदा गोदा गणदा गायनप्रिया॥२८॥

गंगा भागीरथी भंगा भगा भाग्यविवर्द्धिनी।
भवानी भवहन्त्री च भैरवी भैरवीसमा॥२९॥
भीमा भीमरवा भैमी भीमानन्द प्रदायिनी।
शरण्या शरणा शम्या शशिनी शंखनाशिनी॥३०॥
गुणा गुणकरी गौणी प्रियाप्रीतिप्रदायिनी।
जनमोहनकर्त्री च जगदानन्ददायिनी॥३१॥
जिता जाया च विजया विजया जयदायिनी।
कामा काली करालास्या खर्वा खञ्जा खरा गदा॥३२॥
गर्वा गरुत्मती धर्मा घर्घरा घोरनादिनी।
चराचरी चराराध्या छिन्ना छिन्नमनोरथा॥३३॥
छिन्नमस्ता जया जाप्या जगज्जाया च झर्झरी।
झकारा झीष्कृतिष्टीका टंका टंकारनादिनी॥३४॥
ठीका ठक्कुर ठक्कांगी ठठठंकारढुण्ढुरा।
ढुण्ढीताराजतीर्णा च तालस्थाभ्रमनाशिनी॥३५॥
थकारा थकरा दात्री दीपा दीपविनाशिनी।
धन्या धना धनवती नर्मदा नर्ममोदिनी॥३६॥
पद्मा पद्मावती पीता स्फान्ता फूत्कारकारिणी।
फुल्ला ब्रह्ममयी ब्राह्मी ब्रह्मानन्द - प्रदायिनी॥३७॥
भवाराध्या भवाध्यक्षा भगाली मन्दगामिनी।
मदिरा मदिरेक्षा च यशोदा यमपूजिता॥३८॥
याम्या राम्या रामरूपा रमणी ललिता लता।
लंकेश्वरी वाक्प्रदा वाच्या सदाश्रमवासिनी॥३९॥

श्रान्ता शकाररूपा च षकारा खरवाहना।
सह्यादिरूपा सानन्दा हरिणी हरिरूपिणी॥४०॥
हराराध्या बालवा च लवंगप्रेमतोषिता।
क्षपाक्षयप्रदा क्षीरा अकारादिस्वरूपिणी॥४१॥
कालिका कालमूर्तिश्च कलहा कलहप्रिया।
शिवा शन्दायिनी सौम्या शत्रुनिग्रहकारिणी॥४२॥
भवानी भवमूर्तिश्च शर्वाणी सर्वमंगला।
शत्रुविद्राविणी शैवी शुम्भासुर - विनाशिनी॥४३॥
धकारमन्त्ररूपा च धूं बीजपरितोषिता।
धनाध्यक्षसुता धीरा धरारूपा धरावती॥४४॥
चर्विणी चन्द्रपूज्या च छन्दोरूपा छटावती।
छाया छायावती स्वच्छा छेदिनी मेदिनी क्षमा॥४५॥
वलिनी वर्द्धिनी वन्द्या वेदमाता बुधस्तुता।
धारा धारावती धन्या धर्मदानपरायणा॥४६॥
गर्विणी गुरुपूज्या च ज्ञानदात्री गुणान्विता।
धर्मिणी धर्मरूपा च घण्टानादपरायणा॥४७॥
घण्टानिनादिनी घूर्णा घूर्णिता घोररूपिणी।
कलिघ्नी कलिदूती च कलिपूज्या कलिप्रिया॥४८॥
कालनिर्णाशिनी काल्या काव्यदा कालरूपिणी।
वर्षिणी वृष्टिदा वृष्टिर्महावृष्टिनिवारिणी॥४९॥
घातिनी घाटिनी घोण्टा घातकी घनरूपिणी।
धूं बीजा धूं जपा नन्दा धूं बीज जपतोषिता॥५०॥

धूं धूं बीजजपासक्ता धूं धूं बीजपरायणा।
धूं कारहर्षिणी धूमा धनदा धनगर्विता॥५१॥
पद्मावती पद्ममाला पद्मयोनिप्रपूजिता।
अपारा पूरणी पूर्णा पूर्णिमापरिवन्दिता॥५२॥
फलदा फलभोक्त्री च फलिनी फलदायिनी।
फूत्कारिणी फलवाप्त्री फलभोक्त्री फलान्विता॥५३॥
वारिणी वारणप्रीता वारिपाथोधिपारगा।
विवर्णा धूम्रनयना धूम्राक्षी धूम्ररूपिणी॥५४॥
नीतिर्नीतिस्वरूपा च नीतिज्ञा नयकोविदा।
तारिणीताररूपा च तत्त्वज्ञानपरायणा॥५५॥
स्थूला स्थूलाधरा स्थात्री उत्तमस्थान वासिनी।
स्थूला पद्मपदस्थाना स्थानभ्रष्टा स्थलस्थिता॥५६॥
शोषिणी शोभिनी शीता शीतपानीयपायिनी।
शारिणी शांखिनी शुद्धा शंखासुरविनाशिनी॥५७॥
शर्वरी शर्वरीपूज्या च शर्वरीशप्रपूजिता।
शर्वरीजागृता योग्या योगिनी योगिवन्दिता॥५८॥
योगिनीगणसंसेव्या योगिनीयोग भाविता।
योगमार्गरता युक्ता योगमार्गानुसारिणी॥५९॥
योगभावा योगयुक्ता यामिनीपतिवन्दिता।
अयोग्या योधिनी योद्ध्री युद्धकर्मविशारदा॥६०॥
युद्धमार्गरतानन्ता युद्धस्थाननिवासिनी।
सिद्धा सिद्धेश्वरी सिद्धिः सिद्धिगेहनिवासिनी॥६१॥

सिद्धरीतिः सिद्धप्रीतिः सिद्धा सिद्धान्तकारिणी।
सिद्धगम्या सिद्धपूज्या सिद्धवन्द्या सुसिद्धिदा॥६२॥
साधिनी साधनप्रीता साध्या साधनकारिणी।
साधनीया साध्यसाध्या साध्यसंघसुशोभिनी॥६३॥
साध्वी साधुस्वभावा सा साधुसन्तति दायिनी।
साधुपूज्या साधुवन्द्या साधसन्दर्शनीद्यता॥६४॥
साधुदृष्टा साधुपृष्टा साधुपोषणतत्परा।
सात्त्विकी सत्त्वसंसिद्धा सत्त्वसेव्या सुखोदया॥६५॥
सत्त्ववृद्धिकरी शान्ता सत्त्वसंहर्षमानसा।
सत्त्वज्ञाना सत्त्वविद्या सत्त्वसिद्धान्तकारिणी॥६६॥
सत्त्ववृद्धि सत्त्वसिद्धि सत्त्वसम्पन्नमानसा।
चारुरूपा चारुदेहा चारुचञ्चललोचना॥६७॥
छद्मिनी छद्मसंकल्पा छद्मवार्त्ता क्षमाप्रिया।
हठिनी हठसम्प्रीतिर्हठवार्त्ता हठोद्यमा॥६८॥
हठकार्या हठधर्मा हठकर्मपरायणा।
हठसम्भोगनिरता हठात्काररतिप्रिया॥६९॥
हठसम्भेदिनी हृद्या हृद्यवार्त्ता हरिप्रिया।
हरिणी हरिणीदृष्टिर्हरिणीमांसभक्षणा॥७०॥
हरिणाक्षी हरिणपा हरिणीगण हर्षदा।
हरिणीगणसंहन्त्री हरिणीपरिपोषिका॥७१॥
हरिणीमृगयासक्ता हरिणीमान्पुरःसरा।
दीना दीनकृतिर्दूना द्राविणी द्रविणप्रदा॥७२॥

द्रविणाचलसम्वासा द्रविता द्रव्यसंयुक्ता।
दीर्घा दीर्घप्रदा दृश्या दर्शनीया दृढ़ाकृतिः॥७३॥
दृढ़ा दुष्टमतिर्दुष्टा द्वेषिणी द्वेषिभञ्जिनी।
दोषिणी दोषसंयुक्ता दुष्टशत्रुविनाशिनी॥७४॥
देवतार्तिहरा दुष्टदैत्यसंघविनाशिनी।
दुष्टदानवहन्त्री च दुष्टदैत्यनिषूदिनी॥७५॥
देवताप्राणदा देवी देवदुर्गतिनाशिनी।
नटनायकसंसेव्या नर्त्तकी नर्त्तकप्रिया॥७६॥
नाट्यविद्या नाट्यकर्त्री नादिनी नादकारिणी।
नवीन नूतना नव्या नवीनवस्त्रधारिणी॥७७॥
नव्यभूषा नव्यमाल्या नव्यालंकारशोभिता।
नकारवादिनी नम्या नवभूषण भूषिता॥७८॥
नीचमार्गा नीचभूमिर्नीचमार्गगतिर्गतिः।
नाथसेव्या नाथभक्ता नाथानन्दप्रदायिनी॥७९॥
नम्रा नम्रगतिर्नेत्री निदानवाक्यवादिनी।
नारीमध्यस्थिता नारी नारीमध्यगताऽनघा॥८०॥
नारीप्रीति नराराध्या नरनामप्रकाशिनी।
रती रतिप्रिया रमया रतिप्रेमा रतिप्रदा॥८१॥
रतिस्थानस्थिताराध्या रतिहर्षप्रदायिनी।
रतिरूपा रतिध्याना रतिरीतिसुधारिणी॥८२॥
रतिरासमहोल्लासा रतिरासविहारिणी।
रतिकान्तस्तुता राशी राशिरक्षणकारिणी॥८३॥

अरूपा शुद्धरूपा च सुरूपा रूपगर्विता।
रूपयौवनसम्पन्ना रूपराशी रमावती॥८४॥
रोधिनी रोषिणी रुष्टा रोषिरूद्धा रसप्रदा।
मादिनी मदनप्रीता मधुमत्ता मधुप्रदा॥८५॥
मद्यपा मद्यपध्येया मद्यपप्राणरक्षिणी।
मद्यपानन्दसन्दात्री मद्यप्रेमतोषिता॥८६॥
मद्यपानरता मत्ता मद्यपानविहारिणी।
मदिरा मदिरारक्ता मदिरापानहर्षिणी॥८७॥
मदिरापानसन्तुष्टा मदिरापानमोहिनी।
मदिरामानसा मुग्धा माध्वीपा मदिराप्रदा॥८८॥
माध्वीदानसदानन्दा माध्वीपानरता सदा।
मोदिनी मोदसन्दात्री मुदिता मोदमानसा॥८९॥
मोदकर्त्री मोददात्री मोदमंगलकारिणी।
मोदकादानसन्तुष्टा मोदकग्रहणक्षमा॥९०॥
मोदकालब्धिसंक्रुद्धा मोदकप्राप्तितोषिणी।
मांसादा मांससम्भक्षा मांसभक्षणहर्षिणी॥९१॥
मांसपाकपरप्रेमा मांसपाकालयस्थिता।
मत्स्य - मांसकृता - स्वादामकारपंचकार्चिता॥९२॥
मुद्रा मुद्रान्विता माता महामोहामनस्विनी।
मुद्रिका मुद्रिकायुक्ता मुद्रिकाकृतलक्षणा॥९३॥
मुद्रिकालंकृता माद्री मन्दराचलवासिनी।
मन्दराचलसंसेव्या मन्दराचलभाविनी॥९४॥

मन्दरध्येयपादाब्जा मन्दरारण्यवासिनी।
मन्दुरावासिनी मन्दा मारिणी मारिका मिता॥९५॥
महामारी महामारीशमिनी शवसंस्थिता।
शवमांसकृताहारा श्मशानालयवासिनी॥९६॥
श्मशानसिद्धिसंहृष्टा श्मशानभवनस्थिता।
श्मशानशयनागारा श्मशानभस्मलेपिता॥९७॥
श्मशानभस्मभीमांगी श्मशानावासकारिणी।
शामिनी शमनाराध्या शमनस्तुतिवन्दिता॥९८॥
शमनाचारसन्तुष्टा शमनागारवासिनी।
शमनस्वामिनी शान्तिः शान्तसज्जनपूजिता॥९९॥
शान्तापूजापरा शान्ता शान्तागारप्रभोजिनी।
शान्तपूज्या शान्तवन्द्या शान्तग्रहसुधारिणी॥१००॥
शान्तरूपा शान्तियुक्ता शान्तचन्द्रप्रभाऽमला।
अमला विमलाऽम्लाना मालतीकुञ्जवासिनी॥१०१॥
मालतीपुष्पसम्प्रीता मालतीपुष्पपूजिता।
महोग्रा महती मध्या मध्यमध्वनिकारिणी॥१०२॥
मध्यमध्वनिसम्प्रीता मध्यमध्वनिकारिणी।
मध्यमा मध्यमप्रीतिर्मध्यमप्रेमपूरिता॥१०३॥
मध्यांगचित्रवसना मध्यखिन्ना महोद्धता।
महेन्द्रसुरसम्पूज्या महेन्द्रपरिवन्दिता॥१०४॥
महेन्द्रजालसंयुक्ता महेन्द्रजालकारिणी।
महेन्द्रमानिता मान्या मानिनीगणमध्यगा॥१०५॥

मानिनीमानसंप्रीता मानविध्वंसकारिणी।
मानिन्याकर्षिणी मुक्तिर्मुक्तिदात्री सुमुक्तिदा॥१०६॥
मुक्तिद्वेषकरी मूल्यकारिणी मूल्यहारिणी।
निर्मूला मूलसंयुक्ता मूलिनी मूलमन्त्रिणी॥१०७॥
मूलमन्त्रकृतार्हाद्या मूलमन्त्रार्घहर्षिणी।
मूलमन्त्रप्रतिष्ठात्री मूलमन्त्रप्रहर्षिणी॥१०८॥
मूलमन्त्रप्रसन्नास्या मूलमन्त्रप्रपूजिता।
मूलमन्त्रप्रणेत्री च मूलमन्त्रकृतार्चना॥१०९॥
मूलमन्त्रप्रहृष्टात्मा मूलविद्या मलापहा।
विद्याऽविद्या वटस्था च वटवृक्षनिवासिनी॥११०॥
वटवृक्षकृतस्थाना वटपूजापरायणा।
वटपूजापरिप्रीता वटदर्शनलालसा॥१११॥
वटपूजाकृताह्लादा वटपूजाविवर्धिनी।
वशिनी विवशाराध्या वशीकरणमन्त्रिणी॥११२॥
वशीकरणसम्प्रीता वशीकारकसिद्धिदा।
बटुका बटुकाराध्या बटुकाहारदायिनी॥११३॥
बटुकार्चापरा पूज्या बटुकार्चाविवर्द्धिनी।
बटुकानन्दकर्त्री च बटुकप्राणरक्षिणी॥११४॥
बटुकेज्याप्रदाऽपारा पारिणी पार्वतीप्रिया।
पर्वताग्रकृंतावासा पर्वतेन्द्रप्रपूजिता॥११५॥
पार्वतीपतिपूज्या च पार्वतीपतिहर्षदा।
पार्वतीपतिबुद्धिस्था पार्वतीपतिमोहिनी॥११६॥

पार्वतीयद्विजाराध्या पर्वतस्था प्रतारिणी।
पद्मला पद्मिनी पद्मा पद्ममालाविभूषिता॥११७॥
पद्मजेढ्यपदा पद्ममालालंकृतमस्तका।
पद्मार्चितपदद्वन्द्वा पद्महस्ता पयोधिजा॥११८॥
पयोधिपारगंत्री च पयोधिपरिकीर्तिता।
पाथोधिपारगा पूता पल्वलाम्बुप्रतर्पिता॥११९॥
पल्वलान्तः पयोमग्ना पवमानगतिगर्तिः।
पय पाना पयोदात्री पानीयपरिकांक्षिणी॥१२०॥
पयोजमालाभरणा मुण्डमालाविभूषिता।
मुण्डिनी मुण्डहन्त्री च मुण्डिता मुण्डशोभिता॥१२१॥
मणिभूषा मणिग्रीवा मणिमालाविराजिता।
महामोहा महाशौर्या महामाया महाहवा॥१२२॥
मानवी मानवीपूज्या मनुवंशविवर्द्धिनी।
मठिनी मठसंहन्त्री मठसम्पत्तिहारिणी॥१२३॥
महाक्रोधवती मूढा मूढशत्रुविनाशिनी।
पाठीनभोजिनी पूर्णा पूर्णहारविहारिणी॥१२४॥
प्रलयानलतुल्याभा प्रलयानलरूपिणी।
प्रलयार्णव संमग्ना प्रलयाब्धिविहारिणी॥१२५॥
महाप्रलयसम्भूता महाप्रलयकारिणी।
महाप्रलयसम्प्रीता महाप्रलयसाधिनी॥१२६॥
महाप्रलयसम्पूज्या महाप्रलयमोदिनी।
छेदिनी छिन्नमुण्डोग्रा छिन्ना छिन्नरूहार्थिनी॥१२७॥

शत्रुसंछेदिनीछिन्ना क्षोदिनी क्षोदकारिणी।
लक्षिणी लक्षसम्पूज्या लक्षिता लक्षणान्विता॥१२८॥
लक्षशस्त्रसमायुक्ता लक्षबाणप्रमोचिनी।
लक्षपूजापराऽलक्ष्या लक्षकोदण्डखण्डिनी॥१२९॥
लक्षकोदण्डसंयुक्ता लक्षकोदण्डधारिणी।
लक्षलीलालया लभ्या लक्षागारनिवासिनी॥१३०॥
लक्षलोभपरा लोला लक्षभक्तप्रपूजिता।
लोकिनी लोकसम्पूज्या लोकरक्षणकारिणी॥१३१॥
लोकवन्दितपादाब्जा लोकमोहनकारिणी।
ललिता लालिता लीना लोकसंहारकारिणी॥१३२॥
लोकलीलाकरी लोक्या लोकसम्भवकारिणी।
भूतशुद्धिकरी भूतरक्षिणी भूतपोषिणी॥१३३॥
भूतवेतालसंयुक्ता भूतसेनासमावृता।
भूतप्रेतपिशाचादिस्वामिनी भूतपूजिता॥१३४॥
डाकिनीशाकिनीडेया डिण्डिमारावकारिणी।
डमरूवाद्यसन्तुष्टा डमरूवाद्यकारिणी॥१३५॥
हुंकारकारिणी होत्री हाविनी हवनार्थिनी।
हासिनी हासिनी हास्यहर्षिणी हठवादिनी॥१३६॥
अट्टाट्टहासिनी टीका टीकानिर्माणकारिणी।
टंकिनी टंकिता टंका टंकमात्रसुवर्णदा॥१३७॥
टंकारिणी टंकाराढ्या शत्रुत्रोटनकारिणी।
त्रुटिता त्रुटिरूपा च त्रुटिसन्देहकारिणी॥१३८॥

तर्षिणी तृट्परिक्लान्ता क्षुत्क्षामा क्षुत्परिप्लुता।
अक्षिणी तक्षिणी भिक्षाप्रार्थिनी शत्रुभक्षिणी॥१३९॥
कांक्षिणी कुट्टिनी क्रूरा कुट्टिनीवेश्मवासिनी।
कुट्टिनीकोटिसम्पूज्या कुट्टिनीकुलमार्गिणी॥१४०॥
कुट्टिनी कुलसंरक्षा कुट्टिनीकुलरक्षिणी।
कालपाशावृता कन्या कुमारीपूजनप्रिया॥१४१॥
कौमुदी कौमुदीहृष्टा करुणादृष्टिसंयुता।
कौतुकाचारनिपुणा कौतुकागारवासिनी॥१४२॥
काकपक्षधरा काकरक्षिणी काकसंवृता।
काकांकरथसंस्थाना काकांकस्यन्दनास्थिता॥१४३॥
काकिनी काकदृष्टिश्च काकभक्षणदायिनी।
काकमाता काकयोनिः काकमण्डलमण्डिता॥१४४॥
काकदर्शनसंशीला काकसंकीर्णमन्दिरा।
काकध्यानस्थदेहादिध्यानगम्याऽथमावृता ॥१४५॥
धनिनी धनिसंसेव्या धनच्छेदनकारिणी।
धुन्धुरा धुन्धुराकारा धूम्रलोचनघातिनी॥१४६॥
धूंकारिणी च धूं मन्त्रपूजिता धर्मनाशिनी।
धूम्रवर्णिनी धूम्राक्षी धूम्राक्षासुरघातिनी॥१४७॥
धूं बीजजपसन्तुष्टा धूं बीजजपमानसा।
धूं बीजजपपूजार्हा धूं बीजजपकारिणी॥१४८॥
धूं बीजाकर्षिता धृष्या धर्षिणी धृष्टमानसा।
धूलीप्रक्षेपिणी धूलीव्याप्तधम्मिललधारिणी॥१४९॥

धूं बीजजपमालाढ्या धूं बीजनिन्दकान्तका।
धर्मविद्वेषिणी धर्मरक्षिणी धर्मतोषिता॥१५०॥
धारास्तम्भकरी धर्ता धारावारिविलासिनी।
धां धीं धूं धैं मन्त्रवर्णा धौं धः स्वाहास्वरूपिणी॥१५१॥
धरित्रीपूजिता धूर्वा धान्यच्छेदनकारिणी।
धिक्कारिणी सुधीपूज्या धामोद्यानिवासिनी॥१५२॥
धामोद्यानपयोदात्री धामधूलिप्रधूलिता।
महाध्वनिमती धूप्या धूपामोदप्रहर्षिणी॥१५३॥
धूपादानमतिप्रीता धूपदानविनोदिनी।
धीवरीगणसम्पूज्या धीवरीवरदायिनी॥१५४॥
धीवरीगणमध्यस्था धीवरीधामवासिनी।
धीवरीगणगोप्त्री च धीवरीगणतोषिता॥१५५॥
धीवरीधनदात्री च धीवरीप्राणरक्षिणी।
धात्रीशा धातृसम्पूज्या धात्रीवृक्षसमाश्रया॥१५६॥
धात्रीपूजनकर्त्री च धात्रीरोणकारिणी।
धूम्रपान रतासक्ता धूम्रपानरतेष्टदा॥१५७॥
धूम्रपानकरानन्दा धूम्रवर्षणकारिणी।
धन्यशब्दश्रुतिप्रीता धुन्धुकारीजनच्छिदा॥१५८॥
धुन्धुकारीष्टसन्दात्री धुन्धुकारिसुमुक्तिदा।
धुन्धुकार्याराध्यरूपा धुन्धुकारिमनस्थिता॥१५९॥
धुन्धुहिताकांक्षा धुन्धुकारीहितैषिणी।
धिन्धिमाराविणी ध्यात्री ध्यानगम्या धनार्थिनी॥१६०॥

धोरिणी धोरणप्रीता धारिणी घोररूपिणी।
धरित्रीरक्षिणी देवी धराप्रलयकारिणी॥१६१॥
धराधरसुताऽशेषधाराधरसमद्युतिः ।
धनाध्यक्षा धनप्राप्तिर्द्धनधान्यविवर्द्धिनी॥१६२॥
धनाकर्षणकर्त्री च धनाहरणकारिणी।
धनच्छेदनकर्त्री च धनहीना धनप्रिया॥१६३॥
धनसंवृद्धिसम्पन्ना धनदानपरायणा।
धनहृष्टा धनपुष्टा दानाध्ययनकारिणी॥१६४॥
धनरक्षा धनप्राणा धनानन्दकरी सदा।
शत्रुहन्त्री शवारूढा शत्रुसंहारकारिणी॥१६५॥
शत्रुपक्षक्षतिप्रीता शत्रुपक्षनिषूदिनी।
शत्रुग्रीवाच्छिदा छाया शत्रुपद्धतिखण्डिनी॥१६६॥
शत्रुप्राणहराहार्या शत्रून्मूलनकारिणी।
शत्रुकार्यविहन्त्री च सांगशत्रुविनाशिनी॥१६७॥
सांगशत्रुकुलच्छेत्री शत्रुसद्मप्रदायिनी।
सांगसायुधसर्वारि सर्वसम्पत्तिनाशिनी॥१६८॥
सांगसायुधसर्वारि - देहगेहप्रदाहिनी ।
इतीदं धूमरूपिण्याः स्तोत्रं नामसहस्रकम्॥१६९॥

॥ फलश्रुति ॥

यः पठेच्छून्यभवने सन्ध्यान्ते यतमानसः।
मदिरामोदयुक्तो वै देवीध्यानपरायणा॥१७०॥

तस्य शत्रुः क्षयं याति यदि शक्रसमोऽपि वै।
भवपाशहरं पुण्यं धूमावत्याः प्रियं महत्॥१७१॥
स्तोत्र सहस्रनामाख्यं मम वक्त्राद्विनिर्गतम्।
पठेद्वा शृणुयाद्वापि शत्रुघातकरो भवेत्॥१७२॥
न देयं परशिष्यायाऽभक्ताय प्राणवल्लभे।
देय शिष्याय भक्ताय देवीभक्तपराय च॥१७३॥
इदं रहस्यं परमं दुर्लभं दुष्टचेतसाम्॥१७४॥

(इति धूमावती-सहस्रनाम-स्तोत्रं सम्पूर्णम्)

ॐ

अध्याय 13

धूमावती-मन्त्र एवं प्रयोग

1. सप्ताक्षर मन्त्र– धूं धूमावती स्वाहा।

॥ ध्यानम् ॥

ध्यायेत् कालाभ्रनीलां विकलितवदनां काकनासां विकर्णाम्।
संमार्जन्युक शूर्पैयुत मुसल करां वक्रदन्तां विषास्याम्॥
ज्येष्ठां निर्वाणवेषां प्रकुटित नयनां मुक्तकेशी - मुदाराम्।
शुष्कोत्तुंगाति तिर्यक् स्तनभर युगलां निष्कृपां शत्रुहन्त्रीम्॥

विनियोग– ॐ धूमावती सप्ताक्षर मन्त्रस्य नारसिंह ऋषिः, पंक्तिश्छंदः, श्री धूमावती देवता, धूं बीजं, स्वाहा शक्तिः शत्रु-निग्रहे जपे विनियोगः।

इसके उपरान्त ऋष्यादिन्यास करें–

नारसिंह ऋषये नमः शिरसि।

पंक्तिश्छन्दसे नमः मुखे।

धूमावत्यै नमः हृदि।

धूं बीजाय नमः गुह्ये।

स्वाहा शक्तये नमः पादौ।

शत्रु-निग्रहे जपे विनियोगाय नमः सर्वांगे।

इसके बाद षडंगन्यास करें–

ॐ धां हृदयाय नमः।

ॐ धीं शिरसे स्वाहा।

ॐ धूं शिखायै वषट्।

ॐ धैं कवचाय हुम्।

ॐ धौं नेत्रत्रयाय वौषट्।

ॐ धः अस्त्राय फट्।

इसके उपरान्त करन्यास करें–

ॐ धां अंगुष्ठाभ्यां नमः।

ॐ धीं तर्जनीभ्यां स्वाहा।

ॐ धूं मध्यमाभ्यां वषट्।

ॐ धैं अनामिकाभ्यां हुम्।

ॐ धौं कनिष्ठिकाभ्यां वौषट्।

ॐ धः करतल-कर-पृष्ठाभ्यां फट्।

उपर्युक्तानुसार न्यासादि सम्पन्न करने के उपरान्त यथा-सम्भव जप करें। यदि पुरश्चरण करना हो तो कृष्णपक्ष की चतुर्दशी से उपवास रखते हुए, किसी निर्जन घर, श्मशान अथवा वन-प्रदेश में मौन रहते हुए तथा केवल निशा काल में ही भोजन करते हुए एक लाख की संख्या में जप करें। जप का दशांश होम तिल मिश्रित घी से करें तथा होम का दशांश तर्पण, तर्पण का दशांश मार्जन तथा मार्जन का दशांश ब्राह्मण भोजन करायें।

2. **अष्टाक्षर मन्त्र– धूं धूं धूमावती स्वाहा।**

तन्त्रान्तर में यह मन्त्र इस प्रकार है–

धूं धूं धूमावती ठः ठः।

विनियोग– ॐ अस्य धूमावती मन्त्रस्य पिप्पलाद ऋषिः, निवृच्छंदः, धूमावती देवता, धूं बीजं, स्वाहा शक्तिः, धूमावती कीलकं शत्रु-निग्रहे जपे विनियोगः।

ऋष्यादिन्यास–

पिप्पलाद ऋषये नमः शिरसि।

निवृच्छन्दसे नमः मुखे।

धूमावत्यै देवतायै नमः हृदि।

धूं बीजाय नमः गुह्ये।

स्वाहा शक्तये नमः पादौ।

शत्रु-निग्रहे जपे विनियोगाय नमः सर्वांगे।

इसके बाद अंगन्यास करें–

ॐ धां हृदयाय नमः।

ॐ धीं शिरसे स्वाहा।

ॐ धूं शिखायै वषट्।

ॐ धैं कवचाय हुम्।

ॐ धौं नेत्रत्रयाय वौषट्।

ॐ धः अस्त्राय फट्।

इसके उपरान्त करन्यास करें–

ॐ धां अंगुष्ठाभ्यां नमः।

ॐ धीं तर्जनीभ्यां स्वाहा।

ॐ धूं मध्यमाभ्यां वषट्।

ॐ धैं अनामिकाभ्यां हुम्।

ॐ धौं कनिष्ठिकाभ्यां वौषट्।

ॐ धः करतल-कर-पृष्ठाभ्यां फट्।

इसके उपरान्त निम्नलिखित ध्यान करें–

॥ ध्यान ॥

विवर्ण्णा चञ्चला कृष्णा दीर्घा च मलिनाम्बरा।
विमुक्त-कुन्तला रूक्षा विधवा विरलद्विजा॥१॥
काकध्वज - रथारूढा विलम्बित - पयोधरा।
शूर्पहस्तातिरूक्षाक्षा धूतहस्ता वरान्विता॥२॥
प्रवृद्धघोणा तु भृशंकुटिला कुटिलेक्षणा।
क्षुत्पिपासार्द्दिता नित्यम्भयदा कलहास्पदा॥३॥

उक्त प्रकार से ध्यान करके साधक को पूर्वोक्त विधि से जप व पूजा करनी चाहिए। मन्त्र का पुरश्चरण करने हेतु किसी भी कृष्णपक्ष की (यदि चातुर्मास की अथवा ज्येष्ठ मास की चतुर्दशी या ज्येष्ठ नक्षत्र हो तो अच्छा है।) से उपवास करके दिन-रात मौन रहकर किसी निर्जन गृह, श्मशान अथवा वन में एक लाख की संख्या में जप करना चाहिए। तद्गोपरान्त नियमानुसार होम, तर्पण आदि करने चाहिए। इस काल में उष्णीय तथा गीले वस्त्र धारण करने चाहिए। इस विधि से अनुष्ठान सम्पन्न करने पर साधक को मन्त्र की सिद्धि प्राप्त होती है। मन्त्र सिद्ध हो जाने के उपरान्त यदि साधक को काम्य प्रयोग करने हों तो निम्नवत् सम्पन्न करने चाहिए।

1. कृष्ण पक्ष की चतुर्दशी के दिन व्रत करके, अपने केश खुले रखकर निर्जन घर में, श्मशान में, घने जंगल में, किसी गुफा में, किसी कन्दरा में अथवा किसी पर्वत पर बैठकर भगवती धूमावती का ध्यान करते हुए एक लाख की संख्या में साधक को मन्त्र-जप करके राई तथा नमक का मिश्रण करके दशांश होम करना चाहिए। शत्रु-विनाश के लिए यह एक उत्तम प्रयोग है।
2. हड्डी पर मन्त्र लिखकर, उसके ऊपर शिवलिंग की स्थापना करके मन्त्र-जप करना चाहिए। शिव को अवष्टभ्य करके शत्रु का नाम लेकर जप करने से घोरतम शत्रु का भी विनाश हो जाता है।
3. शत्रु के नाम पर मूल मन्त्र **धूं धूं धूमावती ठः ठः** लिखकर उसके ऊपर शिवलिंग की स्थापना करें तथा पूजन व जप करें, तो शत्रु का विनाश होता है। इसके अतिरिक्त दूसरे प्रयोग में शिवलिंग का निर्माण करके "अमुकं मारय" इस प्रकार शत्रुनाम लेते हुए 500 की संख्या में जप करना चाहिए। इससे शत्रु ज्वर से ग्रस्त हो जाता है। 'अमुक' के स्थान पर शत्रु का नाम लें। यदि उसका ज्वर उतारना हो तो पंचगव्य अथवा दूध से होम करना चाहिए।
4. हल्दी के पत्ते पर शत्रु का नाम लिखकर किसी जंगल में डालकर उस पर मूल मन्त्र का दस हजार की संख्या में जप करने से शत्रु का उच्चाटन होता है।
5. श्मशान की अग्नि में कौए को दग्ध करके उसकी भस्म लेकर उसे 108 बार मूल मन्त्र से अभिमन्त्रित करके, शत्रु का नाम

लेते हुए उसे आठों दिशाओं में फेंकने से भी शत्रु का उच्चाटन होता है।

6. मन्त्र के अन्त में "ठः ठः" के स्थान पर "स्वाहा" लगाकर अनुष्ठान सम्पन्न करने से पूर्वजन्मकृत दोषों का निवारण होता है।
7. कृष्ण पक्ष में अष्टमी अथवा चतुर्दशी को श्मशान की भस्म लेकर उससे शिवलिंग का निर्माण करें तथा उस पर शत्रु के नाम सहित मूल मन्त्र को लिखकर पूजन करें। फिर भैंस के दूध से धूप देकर, जिन-जिन पदार्थों से शत्रु का अमंगल होता हो, वे ही द्रव्य शिवलिंग को अर्पित करें। परिणामस्वरूप भगवती भैंस का स्वरूप बनाकर शत्रु का विनाश करती हैं।
8. श्मशान की भस्म लेकर उससे एक सुन्दर शिवलिंग का निर्माण करें। फिर उसका पूजन करें। इसके उपरान्त "हे भगवान!" का सम्बोधन करके अपने शत्रुओं का नाम लेकर नीम के पत्ते और कौए के पंख एकत्र करें, उन पर मूल मन्त्र का 108 की संख्या में जप करें। तद्रोपरान्त "अमुक द्वेषय-द्वेषय" बोलकर मूल मन्त्र का पुनः उच्चारण करके धूप दें। इस प्रयोग से शत्रु वर्ग में विद्वेषण हो जाता है। उनके मध्य यदि किये गये विद्वेषण की शान्ति करनी हो तो चिता की लकड़ी लाकर अग्नि प्रज्ज्वलित करके उसमें दूध से हवन करना चाहिए।
9. शत्रु-संहार के लिए किसी रजस्वला स्त्री के रक्ताक्त वस्त्र से निर्मित धूप को जलाकर निवेदन करने से कालिका गृध रूप में आकर शत्रु का संहार करती है। यदि उक्त प्रयोग को शान्त करना हो तो निर्माल्य के फूल-पत्तों द्वारा धूप देने से शान्ति हो

जाती है। शिवलिंग पर चढ़ाये गये पुष्प आदि को निर्माल्य कहा जाता है।

10. वराह-कर्ण द्वारा धूप देने से भगवती रात्रि में शूकर रूप धारण करके आती है तथा शत्रु का नाश करती है।

पीपल के पत्तों की धूप देकर पंचगव्य अथवा दूध या घी, शहद और शक्कर से होम करने से सभी प्रकार के अभिचार कर्मों की शान्ति होती है।

॥ नोट करने योग्य ॥

अध्याय 14

श्री धूमावती माला-मन्त्र

